# নরসিংহস্তুতী শুক্রাচার্যপ্রোক্ত নরসিংহপুরাণে

{॥ নরসিংহস্তুতী শুক্রাচার্যপ্রোক্ত নরসিংহপুরাণে ॥}

মার্কণ্ডেয় উবাচ

বামনেন স বিদ্ধাক্ষো বহুতীর্থেষু ভার্গবঃ ।

জাহ্নবীসলিলে স্থিত্বা দেবমভ্যর্চ্য বামনম্ ॥ ১॥

ঊর্ধ্ববাহুঃ স দেবেশং শংখচক্রগদাধরম্ ।

হৃদি সংচিন্ত্য তুষ্টাব নরসিংহং সনাতনম্ ॥ ২॥

শুক্র উবাচ

নমামি দেবং বিশ্বেশং বামনং বিষ্ণুরূপিণম্ ।

বলিদর্পহরং শান্তং শাশ্বতং পুরুষোত্তমম্ ॥ ৩॥

ধীরং শূরং মহাদেবং শঙ্খচক্রগদাধরম্ ।

বিশুদ্ধং জ্ঞানসম্পন্নং নমামি হরিমচ্যুতম্ ॥ ৪॥

সর্বশক্তিময়ং দেবং সর্বগং সর্বভাবনম্ ।

অনাদিমজরং নিত্যং নমামি গরুডধ্বজম্ ॥ ৫॥

সুরাসুরৈর্ভক্তিমদ্ভিঃ স্তুতো নারায়ণঃ সদা ।

পূজিতং চ হৃষীকেশং তং নমামি জগদ্গুরুম্ ॥ ৬॥

হৃদি সংকল্প্য যদ্রূপং ধ্যায়ন্তি যতয়ঃ সদা।

জ্যোতীরূপমনৌপম্যং নরসিংহং নমাম্যহম্ ॥ ৭॥

ন জানন্তি পরং রূপং ব্রহ্মাদ্যা দেবতাগণাঃ।

যস্যাবতাররূপাণি সমর্চন্তি নমামি তম্ ॥ ৮॥

এতৎসমস্তং যেনাদৌ সৃষ্টং দুষ্টবধাৎপুনঃ।

ত্রাতং যত্র জগল্লীনং তং নমামি জনার্দনম্ ॥ ৯॥

ভক্তৈরভ্যর্চিতো যস্তু নিত্যং ভক্তপ্রিয়ো হি যঃ।

তং দেবমমলং দিব্যং প্রণমামি জগৎপতিম্ ॥ ১০॥

দুর্লভং চাপি ভক্তানাং যঃ প্রযচ্ছতি তোষিতঃ।

তং সর্বসাক্ষিণং বিষ্ণুং প্রণমামি সনাতনম্ ॥ ১১॥

নরসিংহপুরাণে অধ্যায ৫৫ শ্লোক ২-১২, অধ্যায শ্লোক সংখ্যা ২০

শ্রীনরসিংহপুরাণে শুক্রবরপ্রদানো নাম পঞ্চপঞ্চাশোঽধ্যাযঃ ॥ ৫৫॥

From Narasimhapurana adhyAya 55 verses 2-12

Proofread by Singanallur Ganesan singanallur at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ভoday

http://sanskritdocuments.org

Narasimha Stuti ( By Shukracharya ) Lyrics in Bengali PDF
% File name : narasiMhastutishukrAchAryaproktaNP.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Singanallur Ganesan singanallur at gmail.com
% Translated by : https://archive.org/details/NarsimhaPuranGitapress
% Description-comments : Narasimhapurana adhyAya 55
% Latest update : June 6, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website